श्रीगणेशाय नमः यामाद्यां प्रकृतिं स्त्रीणां तु ह्रौं शरणं गता तां नत्वा प्रत्ययेनापि विचारः क्रियते मया १ अजाद्यतष्टाबिति नन्वत्र प्रत्ययमात्रस्य द्योतकत्वे विधीयते टाप् एव नानायः सर्वप्रत्ययवाचकरूपदाभावात् अध्याहृत्य विधीयमानानामिति चेन्न प्रकरणाविरोधापत्तेः संदर्भादि

दश संस्कार कर्म
पद्धति पत्र २५

इस दश संस्कार पद्धति मे
नांदी तथा श्राद्ध सम्पन्न
प.१ से ४ चार पत्र तक
समाप्त हुआ है॥

Acc. 2231

पु॰ म॰ मं॰ १ मा॰ त॰ १ मत्रिका मयी श्रियं च २

द॰ क॰ १ श्रीगणेशाय नमः अथाभ्युदयिकं श्राद्धं तत्र प्रथमं तावत् कृत्वौ पूजा निधि प्रातःकाले प्रातः कृत २वी १
नित्यक्रियः कुंभपट्टके वा स्थापितरक्षीकायां वा गणपति सहित षोडश मातृः पूजयेत् तदभावे रक्तिका
यामेव पूजयेत् मातरश्च गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वाहा स्वधा मातरो लोकमा
ला॰ ४ तरः हृष्टि पुष्टिस्तथा तुष्टि आत्मकुलदेवता तत्र क्रमः आचम्य प्राङ्मुख उपविश्य अद्येत्यादि कुशानुगृहीत्वा ओं अ त ४
द्यामुकगोत्रस्यामुकशर्मणो वा अमुकस्यामुककर्मणि गणपति दुर्गा श्री सहित गौर्यादि षोडश मातृः २ हं पूजयिष्ये इति वाक्यं
कृत्वा दक्षिणकरेणाभिषिक्ताः पद्मा प्रथमरक्षिकामारभ्य क्रमेण गणपतिरसि गौर्यसि पद्मासि शच्यसि मेधासि सावित्र्य
सि विजयासि जयासि देवसेनासि स्वधासि स्वाहासि मातरः स्थ लोकमातरः स्थ हृष्टिरसि पुष्टिरसि तुष्टिरसि आत्मकुल
सि ८ देवतासि श्रीरेतेतोऽन्नमादाय नः अथ प्रथमरक्षिकामारभ्य ओं भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ ओं भूर्भुवः स्वः गौरी इहागच्छ इह ति
ष्ठ एवमेव पद्मा सची सावित्री मेधा विजया जया देवसेना स्वधा मातरो लोकमातरः हृष्टि पुष्टिस्तथा तुष्टिरात्मकुल
देवताः श्रीः एता प्रत्येकमोंकारमाहृति पूर्वमावाहयित्वा पठित्वा ओं मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं त
पुं ५ नोत्वरिष्टं यज्ञं समिमं दधातु विश्वेदेवास इह मादयंतामों प्रतिष्ठ इत्यक्षतान् विकीर्य एकैकस्य सर्वत्र प्रतिष्ठां कुर्यात्
ततः पूर्वादिक्रमेण प्रथमतः आरभ्य एतानि पाद्यार्घ्याचमनीय स्नानीय पुनराचमनीयानि ओं गणपतये नमः इदमनुलेपनं ओं गणपतये नमः पुष्पं ओं गण
पतये नमः इति त्रिः एतानि गंधपुष्पदीपतांबूलनैवेद्यानि ओं गणपतये नमः एवमेव ओं गौर्यै नमः ओं पद्मायै नमः ओं शच्यै नमः ओं मेधायै नमः ओं सावित्र्यै नमः ओं राम
विजयायै नमः ओं जयायै नमः ओं देवसेनायै नमः ओं स्वधायै नमः ओं स्वाहायै नमः ओं मातृभ्यो नमः ओं लोकमातृभ्यो नमः ओं हृष्ट्यै नमः ओं पुष्ट्यै नमः ओं तुष्ट्यै नमः ओं १
आत्मकुलदेवतायै नमः ओं श्रियै नमः इति पाद्यादिभिः प्रत्येकमर्चयेत् ततोंजलिं बध्वा सर्वाः प्रणम्यादौ जपेत् तत्र प्रकारः ओं गणपति सहिताः षोडश

श्री १

अस्मिन्यज्ञे स्वधयामदन्तोऽधिब्रुवंतु तेऽवंत्वस्मान् इति जमाग्र्यघर्क ॥ तत्र दैवपूर्वं सर्वेष्वर्घपात्रेषु पवित्राणि दत्वा पवित्रेस्थो इति ॐ शन्नो देवीरभिष्टय आ
दै. श्रा. २ पो भवंतु पीतये शंयोरभिस्रवंतु नः इति जलं क्षिपेत् ततो देवार्घपात्रेषु यवोसि यवयास्मद्द्वेषो यवयारातीः इति यवान्क्षिपेत् मात्रादिपात्रेषु ॐ यवोसि सोमदेव
त्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पानादीमुर्वान्प्रीणयन् लोकान्नः शीराणादिनः स्वाहा इति मंत्रेण यवान्क्षिपेत् ततः प्रत्येकं गंधपुष्पाणि तूष्णीं
दद्यात् ततः प्रथमं देवपात्रं वामहस्ते न कृत्वा तत्रस्थपवित्रं भोजनपात्रे निधाय तदुपरि किंचिदन्यजलं दत्वा ॐ या दिव्या आपः पयसा संबभूवुर्या अंतरिक्ष उ
त पार्थिवीर्या हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शं स्योना सुहवा भवंतु इति पूर्वोक्ताकुशत्रयं यवजलान्यादाय ॐ अद्यामुकगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकदेवीनां नांदीमुखीनामाभ्युदयिकश्राद्धसंबंधिनो विश्वे देवा एष वो हस्तार्घो नमः एवमेव पित्रादिश्राद्धदेवेभ्यो मातामहादिश्राद्धदेवेभ्यो हस्तार्घं दद्यात् ततो मातुरर्घपात्रमादाय पूर्ववत्कृत्वा ॐ या दिव्या इत्यादि पठित्वा कुशादीनादाय ॐ अद्यामुकगोत्रे मातरमुकदेवि नांदीमुख्याभ्युदयिकश्राद्धएष ते २५
2 हस्तार्घो नमः एवमेव पितामहीप्रपितामह्योर्दद्यात् ततः पित्रार्घपात्रमादाय सर्वं पूर्ववत्कृत्वा कुशादीनादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन्नांदी
मुखाभ्युदयिकश्राद्ध एष ते हस्तार्घो नमः एवं पितामहादीनां च तेभ्यो हस्तार्घं दद्यात् ततो वस्तिष्ठजलपवित्र पतंप्रथमं देवार्घपात्रमादाय ॐ विश्वेभ्यो देवेभ्यः
२६ स्थानमसीति देवासने दक्षिणभागे उत्तानं स्थापयेत् एवम पदे वार्घपात्रं द्वयं तत्तद्दक्षिणभागे निधाय पितामह्यर्घपात्रोपरि तस्यात्र स्थित
[illegible] पवित्रादि मातृ अर्घपात्रे निधाय मातृअर्घपात्रं पितामह्यर्घपात्रोपरि तत्पात्रं प्रपितामह्यर्घपात्रोपरि धृत्वा दक्षिणाको
दाय ॐ मातृभ्यः स्थानमसीति मात्रासनवामभागे ॐ पितृभ्यः स्थानमसीति अर्घपात्राण्युब्जीकुर्यात् एवं मातामहार्घपात्राण्यपि मेलनं कृत्वा मातामहास
न दक्षिणभागे ॐ मातामहप्रमातामहवृद्धप्रमातामहेभ्यः स्थानमसीति न्युब्जीकुर्यात् ततो गंधादिदानं तत्र क्रमः अद्यामुकगोत्राणां मातृपितामहीप्रपिता
महीनाममुकामुकदेवीनां नांदीमुखीनामाभ्युदयिकश्राद्धसंबंधिनो विश्वेदेवा एतानि गंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि वो नमः एवं पित्रादिदेव एम २
भ्यो मातामहादिदेवेभ्योऽपि दद्यात् ततः ॐ अद्यामुकगोत्रे मातरमुकदेवि नांदीमुख्याभ्युदयिकश्राद्ध एतानि गंधपुष्पधूपदीपतांबूलसिंदूरवासांसि ते नमः ए

प्रपितामह्यर्घपात्रे स्थितपवित्रादि

मातरः स्वमध्यमिति ततः ॐ विष्णोः पवित्रमसि शतधारं विष्णोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु विष्णोः पवित्रेण शतधारेण सुप्वा कामधुक्षः इत्यनेन सितेन पंच
वासप्रवाघतधारादद्यात् ततो वामहस्तेन पैत्रमेकं गृहीत्वा दक्षिणहस्तेन उत्तरोत्तरक्रमेण फलेन चलाः प्रतीक्षेत् अथाभ्युदयिक प्रयोगः तत्र दक्षिणोत्तरक्रमेण द्वादशस्था
नेषु प्रत्येकमासादितद्रव्यं ज्वलितदीपं देशमागत्य प्राङ्मुखो दङ्मुखो वा उपविश्य सर्वं सव्येन कर्तव्यं कुशस्थाने कुशतिलस्थाने यवाः कर्तव्याः ततः ॐ पवित्रे पवित्रेण वासर्वा दत्त्वा अ
सेचिता यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॐ पुण्डरीकाक्षः पुनातु इति मन्त्रद्वयं पठित्वा शिरसि कुशोदकेन ततः कुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्राणां मातृपितामही
 प्रपितामहीनाममुकामुकदेवीनां तथामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां तथामुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्म
५ णां नान्दीमुखानाममुकगोत्रस्यामुकस्य कर्तव्यामुकैः मैत्रिकां अभ्युदयिकश्राद्धमहं करिष्ये इति संकल्पयेत् तदुपायश्रौं देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च इत्यादि
त्रिर्जपेत् ततः ॐ अद्यामुकगोत्राणां मातृपितामही प्रपितामहीनाममुकामुकदेवीनां नान्दीमुखीनामाभ्युदयिकश्राद्धसंबन्धिनो विश्वेदेवा दक्षमासनं वो नमः इति कुशत्र
यं रूपं सपवमसिनं दक्षिणतः आस्यदुत्सृजेत् एवं पित्रोः ॐ अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां नान्दीमुखानामाभ्युदयिकश्राद्धसंबन्धिनो विश्वे
देवा दक्षमासनं वो नमः ॐ अद्यामुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां नान्दीमुखानामाभ्युदयिकश्राद्धसंबन्धिनो विश्वेदेवा इदमासनं वो नमः
ॐ अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुख्याभ्युदयिकश्राद्धे इदमासनं ते नमः एवं पितामहीप्रपितामह्योरभ्युदयिकमासनं दद्यात् ॐ अद्यामुकगोत्र पितरमुकशर्मन् नान्दीमु
खाभ्युदयिकश्राद्धे इदमासनं ते नमः एवं पितामहप्रपितामहयोरपि ॐ अद्यामुकगोत्र मातामहामुकशर्मन् नान्दीमुखाभ्युदयिकश्राद्धे इदमासनं ते नमः एवं प्रमातामह
वृद्धप्रमातामहयोरपि ततश्चावाहने ॐ अद्य विश्वान् देवानावाहयिष्ये ॐ विश्वेदेवास आगत शृणुता म इमं हवं एदं बर्हिर्निषीदत इत्यावाह्य ॐ यवोसि यवयास्मद्द्वेषो
यवयारातीः इति देवपात्रे यवान् विकीर्य ॐ विश्वेदेवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वं ॐ आगच्छन्तु महा
भागा विश्वेदेवा महाबलाः ये यत्र विहिता श्राद्धे सावधाना भवन्तु ते इति पठेत् ततः ॐ नान्दीमुखान् पितॄनावाहयिष्ये ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि उशन्नुशत आ व
ह पितॄन् हविषे अत्तवे इति पितॄनावाह्य ॐ अपहता असुरा रक्षांसि वेदिषदः इति मात्रादिपात्रेषु यवान् विकीर्य ॐ आयन्तु नः पितरः सोम्या अग्निष्वात्ताः पथिभिर्देवयानैः

मूर्मिपरिस्तीर्य उत्तरोत्तरक्रमेण स्थानत्रये प्रादेशमात्रं परिमाय तत्र गण्डरेखां रेखां पैंजुलीमूलेन ॐ अपहता इत्यादिना कुर्यात् ततः प्रत्येकं रेखात्रयोपरि ॐ ये रूपाणि प्रतिमु
ञ्चमाना असुराः सन्तः स्वधया चरन्ति परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मादिति मन्त्रेणांगारं भ्रामयेत् तदुपरि प्रत्येकं कुशत्रयमास्तीर्य देवताभ्य इति त्रिर्ज
पित्वा प्रत्येकं मवनेजनं दद्यात् तत्क्रमः जलयवगन्धपुष्पैर्नवपात्राणि पूरयित्वा पात्रमेकं वामकरे कृत्वा कुशादीनादाय ॐ अद्यामुकगोत्रे मातरमुकदेवीनां
दीमुख्याभ्युदयिकश्राद्धे अत्रावनेनिक्ष्व ते नमः इति सवीजं दक्षिणाकुशत्रयमूले मात्रेऽवनेजनं दद्यात् किंचिज्जलमवशेषयेत् एवमेव पात्रं तमादाय तत्कु
शमध्ये पितामह्यै तत्कुशत्रयाग्रे प्रपितामह्यै अवनेजनं दद्यात् ततः पात्रान्तरमादाय कुशादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुखाभ्युद
यिकश्राद्धे अत्रावनेनिक्ष्व ते नमः इति मध्यस्थितकुशत्रयमूले पित्रेऽवनेजनं दद्यात् तत्कुशत्रयमध्याग्रयोः पितामहप्रपितामहयोः पित्र्यवनेजनं दद्यात् ततः
सप्तमं पात्रमादाय कुशादीन्यादाय ॐ अद्यामुकगोत्र मातामहामुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धे अत्रावनेनिक्ष्व ते नमः इति परकुशत्रयमूले मातामहाया
वनेजनं दद्यात् एवं तन्मध्याग्रयोः प्रमातामहवृद्धप्रमातामहयोरवनेजनं दद्यात् ततो यवदधिबदरघृतमिश्रान्नेन पिण्डान्कृत्वा पृथक्पिण्डं कुशादीन्यादाय
ॐ अमुकगोत्रे मातरमुकदेवीनान्दीमुख्याभ्युदयिकश्राद्धे एष पिण्डस्ते नमः इति तदवनेजनस्थाने पिण्डं दद्यात् एवमेव पितामहीप्रपितामहीभ्यां तत्तदवने
जनस्थाने पिण्डं दद्यात् ततश्चतुर्थपिण्डमादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धे एष पिण्डस्ते नमः इति तदवनेजनस्थाने पित्रे पिण्डं
दद्यात् एवमेव पितामहादिभ्यश्च तदवनेजनस्थानेषु प्रत्येकं पञ्च पिण्डान् दद्यात् ततो दर्भमूले करं प्रोञ्छ्याचम्य हरिं स्मृत्वा ॐ अत्र मातरो मादयध्वं यथाभागमावृ
षायध्वं इति पठित्वा उदङ्मुखीभूय श्वासं नियम्य तेनैव यथामुखं परावर्तयेत् ॐ अमीमदन्त मातरो यथाभागमावृषायिषत इति जपेत् एवमेव मातामहादिपक्षे मंत्रजपः
ततोऽवनेजनावशिष्टजलेन प्रत्यवनेजनं दद्यात् तत्क्रमः ॐ अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुख्याभ्युदयिकश्राद्धे प्रत्यवनेनिक्ष्व ते नमः इति तत्पिण्डोपरि दद्या
त् एवं पितामहीप्रपितामहीभ्यां तथा ॐ अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धे प्रत्यवनेनिक्ष्व ते नमः इति पिण्डोपरि प्रत्यवनेजनं दद्यात् एवमे
व तत्पितृपिण्डोपरि पितामहादिपञ्चभ्यो दद्यात् ततो नीवीं विस्रस्य वामहस्तेन सूत्रमादाय ॐ नमो वो मातरो रसाय नमो वो मातरः शोषाय नमो वो मातरो
जीवाय नमो वो मातरः स्वधायै नमो वो मातरो घोराय नमो वो मातरो मन्यवे नमो वो मातरो मातरो नमो वो गृहान्नो मातरो दत्त सतो वो मातरो देष्म एतद्वो मा
तरो वासः इति मात्रादिपिण्डत्रयोपरि सूत्रं दद्यात् ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोरा

दद्यात् २ मादाय २

वेपितामह्यौप्रपितामह्यौभ्यामपिगंधादिदानं ततःॐअद्यामुकगोत्रपितरमुकशर्मन्नांदीमुखाभ्युदयिकश्राद्धएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासां
सितेनमः एवंपितामहादिभ्यःप्रदद्यात् ततः ॐ सर्वासनानिभोजनपात्रसहितानिचतुःकोणंजलेनवेष्टयेत् ततःसजलेपुटकादौहस्तेनैवसघृतमन्नं ॐ
अग्नयेकव्यवाहनायस्वाहा ॐसोमायपितृमतेस्वाहा इत्याहुतिद्वयंजुहुयात् ततोऽपसव्यंकृत्वादक्षिणाभिमुखःपातितवामजानुःमोटकतिलजलान्यादाय
इदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिभूस्वामिनेकिंचिदन्नंदद्यात् ततःसव्यंकृत्वा प्राङ्मुखउदङ्मुखोवाहुतशेषमन्नंदेवपूर्वंसर्वपात्रेषुकिंचित्किंचिद्दत्त्वा पि
र्यंकिंचिदवशेषयेत् ततोऽन्यदन्नंयथासंभवंसर्वत्रपरिविष्य घृतंतैजसेचपात्रेउपनीयपात्रमालभेत् तत्रक्रमःउत्तानपाणिभ्यांप्रथमंदेवपात्रंस्पृष्ट्वा ॐपृथिवीतेपा
त्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा इतिपठित्वा ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपांसुरे ॐविष्णोहव्यमिदंरक्षमदीयंइति
पठित्वा इदमन्नमित्यन्ने इमाआपःइतिजले इदमाज्यमितिघृते ॐइदंहविरितिपुनरन्ने दक्षिणांगुष्ठमारोप्य ॐयवोसियवयेसादिनायवान्विकीर्य कुशादीना
दाय ॐअद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकामुकदेवीनांनांदीमुखीनामाभ्युदयिकश्राद्धसंबंधिनोविश्वेदेवा इदमन्नंसोपकरणंवोनमः यदे
कमेवपात्रंभवेत्तदावामेनपाणिनोऽमस्यजलेन ॐइदंविष्णुरित्यादिपठित्वायवक्षेपपर्यंतंकृत्वा कुशादीनादाय पित्रापुत्रेणवानपित्रादिदेवेभ्योन्नमुत्सृ
जेत् एवमेवमातामहादिदेवेभ्यःभिन्नभिन्नपात्रपक्षे पृथिवीतेपात्रमित्यादीनांसर्वेषामावृत्तिः ततोमातृपात्रमुत्तानाभ्यामेवकराभ्यांस्पृष्ट्वा ॐपृथ्वीतइत्यादि ॐइ
दंविष्णुरित्यादिजपित्वा ॐविष्णोहव्यमिदंरक्षमदीयं ॐइदमन्नमित्यन्ने इमाआप इतिजले इदमाज्यमितिघृते ॐइदंहविरितिपुनरन्ने दक्षिणांगुष्ठंनिवेश्य ॐअ
पहताअसुरारक्षांसिवेदिषदःइत्यनेनोपरियवान्विकीर्य ॐअद्यामुकगोत्रामातरमुकदेवीनांदीमुख्याभ्युदयिकश्राद्धइदमन्नंसोपकरणंतेनमः एवंपात्रालंभनादिपूर्वकंप्रत्येकं २६
पितामहीप्रपितामहीभ्यामपिदद्यात् एवंपितृपात्रमालभ्य ॐपृथ्वीतइत्यादिसर्वंपठित्वा ॐअद्यामुकगोत्रपितरमुकशर्मन्नांदीमुखाभ्युदयिकश्राद्धे इदमन्नंसोपकरणंतेनमः इ
तिपित्रेन्नमुत्सृजेत् एवंपितामहादिभ्यःपंचभ्योपिप्रत्येकमन्नमुत्सृजेत् ततःप्रांजलिः ॐअन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् तत्सर्वम ... स्तु इतिजपेत् दर्भेषूपविश्यगाय
त्रींत्रिर्जपित्वा ॐमधुमधुमध्वितिजपेत् ॐमधुवाताऋतायते इत्यादिसूक्तंजपेत् पितृमंत्रान् ... यानितुपुरुषसूक्तादीनिपवित्राणिजपेत् ततस्तृप्तान्ज्ञात्वाब्राह्मणान्पृष्ट्वा सर्वमन्नमेकतःकृत्वा
पंजलेनप्रोक्ष्यजलंप्रोक्षितंसत्यविधमन्नंकुशादिना ॐअग्निदग्धायेजीवायेप्यदग्धाःकुलेमम भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिम् इतिमंत्रेणकुशोपरिपक्वान्नंविकिरेत् ततआच
म्यहरिस्मरणपूर्वंगायत्रींसकृज्जपित्वा ... ततःमधुसंपिण्डयोग्यंपिण्ड

छि ४ २१

अस्तात्स्वाचम्य ॐ अमादाकुर्वतां मे के अच्युवेताः ध्रुवेणुपद् स्मरणाद्देवतद्विप्रेः संपूर्णतास्यादिति श्रुतिः इतिपठेत् प्रतिपत्तिरितिगोपालं विविधां वदंति मुनयः
द. क. ४ नानाविहिताधिके हेमंते शिशिरे प्रयाति मङ्गलानिस्त्री कृतेभास्करे रश्मिभेऽर्ह्वास्तमिते वसंतसमये माघे गते हेरुपतांस्त्वैचात्तहुपागते भगवति प्रावृट्
शरत्कालयोः अयुक्तायवसीयवीतद्दानं तत्रकं न्याभ्रातास्त्रयोधात्राहरणं तु द्वक्षु रवी दातात्राः सुखवुपविष्यचंदनपुष्पसतितयज्ञोपवीतमा
दाय ॐ तस्मिन्काले ग्निसांनिध्ये मातोः अरोगिणीआयुष्मतीमापतितेः स्त्री वे पिता तुभ्यं प्रदास्यति इतिपठित्वा वरस्य हस्ते दद्यात् ततः ॐ अन्नस्य
ऋतावृधः तत्र तु हास्यन्नर तावहः घृतश्च्युतो मधुश्च्युतो विराजो नाम कामदुघा अक्षीयमाणा इतिपठित्वा शिरस्यक्षतोदिकं दद्यात् ततः कुमारी भ्रातान्यः क
4 र्तव्क दानं पक्षे पितृत्यत्र दातेमु चरेदिति श्राद्धः शिशानोवृषभो न भीमो घनाघनः इत्यारभ्य जयंतं त्वानुदेवा मदंतु इत्येवं पठित्वा ॐ आपोअद्यान्वचारि
षं रसेनसमसृक्ष्महि पयस्वानग्न आगमं तं मा संसृज वर्चसा प्रजया च धनेन च आपोअद्यान्वचारिषमित्यपामेव रसमवरुंधे रसेन समसृक्ष्महीत्यपामेव रसमात्म
धत्ते पयस्वानग्न आगमं तं मा संसृज वर्चसा प्रजया च धनेन चेत्याशिषमेवैतदाशास्ते ॐ मंत्रार्थाः सिद्ध्यः संतु पूर्णाः संतु मनोरथाः शत्रूणां बुद्धिनाशोऽस्तु
मित्राणामुदयोऽस्तु वः साधुभवान्याह विष्टरदानं पाद्यार्घ्यदानं द्वितीयविष्टरदानं अर्घदानं आचामकदानं आचमनं गौर्गौर्गौः पादः प्रतिस्थाने कन्यानय
ने वस्त्रदानं ग्रंथिबंधनं आचमनं कन्यादानं आचमनं गणेशाय संधिविग्रह मंत्री इदेवादित्य तनूद्भवः भूमिपाल शिखारोत्तं रजितां घ्रिसरोरुहः संधिविग्र
हकः श्रीमान् बाहुब्रसहोदराः महामहत्तमः श्रीमान्विराजतिगणेश्वरः श्रीमत्तारामदत्तेन मेवेशानस्य सूनुना यत्कृतिः क्रियते धर्मारंभाय धर्मोद्वाजसनेयिना तत्र
विवाहः तत्रादौ कन्यायास्तेन षोडशहस्तमंडपं तद्दक्षिणादिशि पश्चिमां दिशमाश्रित्य मंडपसेत्यव हस्त रामिश्रुवं कौतुकागारं मंडपाद्बहिः रात्मंजातास्तु चतुर्हस्तंसिक
तादियरिक्त तन्तुकेशर्करादिमन्यवेणु निर्मितां वेदिंच कारयेत् विवाहदिने कृतनित्यक्रिये कन्यामातापितामाता पूजापूर्वकमाभ्युदयिकं कर्तव्यं कन्यापिताम्यु
चिःस्नातः शुक्लांबरधरः कृतनित्यक्रियो मातृपूजाभ्युदयिके कृत्वा विवाहवेलायामागतं वरमभ्युपेतं जमानः अत्यस्तु खः अस्तु खं वरमर्ह्णा तु संबोध्य ॐ साधु भवानास्ता
मर्चयिष्यामो भवंतमिति ब्रूयात् ॐ अर्चयेति प्रत्युक्तेः वरोपवेशनार्थं शुक्लमासनं दत्वा विष्टरोमोप ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते ॐ विष्टरः प्रतिगृह्यतां ॐ वि राम
ष्टरं प्रतिगृह्णामीत्यभिधाय विष्टरं गृहीत्वा वरो वदेत् ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः इमं तमभितिष्ठामि यो मा कश्चाभिदासति इत्यस्योपरि उत्तराग्रं विष्टरोप ४

पिण्ड[illegible]समीपे

मनमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्म एतद्वः पितरो वासः इत्यनेन पित्रादिपिण्डत्रयोपरि प्रत्येकं सूत्रं दद्यात्
ततः कुशत्रयपवनजलान्यादाय ॐ अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि आभ्युदयिकश्राद्धे पिण्डोपरि एतद्वासस्ते नमः एवं पितामहीप्रपितामहीभ्यामुत्सृजेत्
ततः ॐ अद्यामुकगोत्र पितरमुकशर्मन् नान्दीमुख आभ्युदयिकश्राद्धे पिण्डे एतत्ते वासो नमः इति मन्त्रमुत्सृजेत् एवं पितामहादिपंचभ्यः सूत्रं दद्यात् ततो गन्धपुष्प
धूपदीपताम्बूलादिभिः प्रत्येकं पिण्डान्सम्पूज्य पिण्डशेषान्नं विकिरेत् ब्राह्मणानाचमय्य सुप्रोक्षितमस्त्विति भूमिं प्रोक्ष्य ॐ शिवा आपः सन्त्विति जलं सौ
मनस्यमस्तु इति पुष्पं अक्षतं चारिष्टं चास्तु इति तण्डुलान् प्रत्येकं पात्रेषु निःक्षिप्य कुशादीना[illegible]दाय ॐ अद्यामुकगोत्राया मातुरमुकदेव्या नान्दीमुख्या आ
भ्युदयिकश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु इति मात्रे एवं पितामह्याः प्रपितामह्याः ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणो नान्दीमुखस्याभ्युदयिकश्राद्धे
दत्तैतदन्नपानादिकमक्षय्यमस्तु इति पित्रे एवं पितामहादिपंचभ्यः तथोदकं दद्यात् ततः ॐ अघोराः मातरः सन्तु इति मात्रादिपिण्डत्रयोपरि[illegible]जलधारां द
द्यात् ॐ अघोराः पितरः सन्तु इति पित्रादिपिण्डषट्कोपरि जलधारां दद्यात् ॐ गोत्रं नो वर्धतां ॐ दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्त्व
न्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च याचिष्म कंचन एताः सत्या आशिषः सन्तु इत्याशीः प्रार्थनं ततः सपवित्रकुशत्रयाणि प्र
त्येकं मात्रादिपिण्डत्रये पित्रादिपिण्डत्रये मातामहादिपिण्डत्रये धृत्वा ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन् इति मात्रादिपि
ण्डोपरि पित्रादिषट्पिण्डोपरि दक्षिणाग्रं जलधारां दद्यात् ततः पिण्डानाघ्रायोत्थाप्य पिण्डपात्रकुशानुल्मुकं चाग्नौ निःक्षिप्य [illegible] दक्षिणां
दद्यात् दक्षिणाद्रव्यं च फलमूलफलं वा प्रत्येकं तत्र क्रमः ॐ अद्यामुकगोत्राणां मातृपितामहीप्रपितामहीनां नान्दीमुखीनामाभ्युदयिकश्राद्धे सम्बन्धिनो विश्वेदेवा
नां कृतैतत् श्राद्धप्रतिष्ठार्थमिमं फलमूलं वनस्पतिदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं समुत्सृजेत् एवं पितामहादिभ्यो दक्षिणां दद्यात् तथैव मातामहादि
देवदक्षिणां दद्यात् ॐ अद्यामुकगोत्राया मातुरमुकदेव्या नान्दीमुख्याः कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमं फलमूलं वनस्पतिदैवतं यथानामगोत्राय ब्राह्मणाय
दक्षिणां समुत्सृजेत् एवं पितामह्याः प्रपितामह्याः श्राद्धदक्षिणां दद्यात् तथैव पित्रादिभ्यो दक्षिणां दद्यात् ततः ॐ विश्वेदेवाः प्रीयन्तां वाचयित्वा देवब्राह्मणं विस
र्जनं ॐ वाजे वाजे इत्यादिना मात्रादिविसर्जनं ततो ब्राह्मणान्तिकं समावाचयेत् [illegible] अस्तु ब्रूयात् उदकधारया प्रदक्षिणीकृत्य देवताभ्य इति त्रिर्जपित्वादौ [illegible]

दं० कं० स्पृष्ट्वा: गोगौगौरिति यजमानेनोक्ते ॐमाता रुद्राणामिति वरः गोगौगौरित्यभिधाय ॐमाता रुद्राणां दुहिता वसूनां स्वसादित्यानाम्

५ मृतस्य नाभिः प्रणु वोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट मम चामुष्य यामुकशर्मणो यजमानस्य पाप्मानं हनोमीत्यालभ

मेतां घयपुस्सिन्ते मम चामुष्य च पाप्मा हतः ॐ उत्सृजत तृणान्यत्तु इति तृणाच्छिन्द्यात् ततो वेदिकायां नुत्तरे प्राणाग्रादिशल्यो स्थमानुपरि

मितां चतुरस्रां भूमिं कुशैः परिसमूह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येनोल्लिख्य वल्लेन च प्रागग्रप्रादेशमात्रे उत्तरोत्तरक्रमेण त्रिरुल्

5 लिख्य उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य तेजस्वीं कांस्यपात्रस्यं वह्निं प्रत्यङ्मुखमुपसमाधाय तदुक्षा पूर्वोक्तविधि

विपुज्य कौतुकागारात् कन्यामानीय मस्तरुधे ॐ जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा शतं च जीव शरदः सुवर्चा रयिं च पुत्रा

ननु संव्ययस्वायुष्मतीदं परिधत्स्व वासः कृष्णि इति पठित्वा परिधानवसनं तस्यै ददाति वरः ॐ या अकृन्तन्नवयन् या अतन्वत

याश्च देवीस्तन्तूनभितो ततन्थ ता स्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठित्वोत्तरीयं ददाति ततः

ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये इति । वरः

त्या वरः पीधत्ते ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च [illegible]

मा विदद्यशो मा प्रतिपद्यताम् इति पठित्वा तरीयं परिदधाति ततो वरस्य कन्यायाश्च परस्परं समञ्जनं ततः कन्याप्रदेन पुरस्ताद्धृतं

जले घृतेति प्रेषेण कन्यावरयोः परस्परमभिमुखीकरणं ॐ समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ संमातरिश्वा सं धाता समु देष्ट्री दधा

तु नौ इति वरः पठति ततः कन्याप्रदः कन्याया दक्षिणहस्तं अणुस्नाने दत्वा गन्धदूर्वाक्षतफलपुष्पचन्दनजलैर्मातामह

जामातुः हस्तोपरि निधाय ॐ दाता इदम्मनोगाभ्यः ममोदि स्य देवेन विप्रासो विप्रर्षयो मतिमनन गृ० मं०

य विधिरिति पठित्वा ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राय अमु ५

कगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्राय अमुकगोत्रस्यामुकप्रवरे

ष्टरउपविशति ततः उपविश्य यजमानः पाद्यमञ्जलिनादाय ॐ पाद्यं पाद्यमित्यन्येनोक्ते ॐ पाद्यं प्रतिगृह्यतामिति वदेत् ॐ पाद्यं प्रतिगृह्णामीत्यभिधा
य यजमानोऽञ्जलितोऽञ्जलिना पाद्यमादाय वरः ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः इति दक्षिणं पादं प्रक्षालयति एतेनैव क्र
मेणानेनैव मंत्रेण वामचरणप्रक्षालनं ततः पूर्ववद्विष्टरांतरं गत्वा पूर्वोक्तमंत्रेण चरणयोरधस्तादुत्तराग्रं वरः कुर्यात् ततो दूर्वाक्षतफलपुष्पचंद
नयुतार्घपात्रं गृहीत्वा यजमानः ॐ अर्घोऽर्घोऽर्घः इत्यन्येनोक्ते ॐ अर्घः प्रतिगृह्यतामिति वदेत् अर्घं प्रतिगृह्णामीत्यभिधाय यजमानहस्तादर्घं गृहीत्वा
ॐ आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानीति मंत्रेण शिरसि क्षिप्त्वा तदिकं किंचिद्दत्वा ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टा अस्माकं वीरा मा
परासेचि मत्पयः इत्यर्घपात्रस्थं जलमैशान्यां त्यजति ततश्चाचमनीयमादाय ॐ आचमनीयमाचमनीयमाचमनीयमित्यन्येनोक्ते ॐ आचमनीयं प्रतिगृ
ह्यतामिति वदेत् ततश्चाचमनीयं प्रतिगृह्णामीत्यभिधाय यजमानहस्तादाचमनीयमादाय ॐ आमागन्यशसा सं सृज वर्चसा तं मा कुरु प्रियं
प्रजानामधिपतिं पशूनामरिष्टं तनूनामित्यनेन सकृदाचमनं द्विस्तूष्णीं ततो यजमानः कांस्यपात्रस्थदधिमधुघृतानि कांस्यपात्रपिहितानि
समादाय ॐ मधुपर्को मधुपर्को मधुपर्कः इत्यन्येनोक्ते ॐ मधुपर्कः प्रतिगृह्यतामिति वदेत् तत ॐ मधुपर्कं प्रतिगृह्णामीत्यभिधाय ॐ मित्रस्य त्वे
ति द्वात्रिंशदक्षरस्य मंत्रेण मधुपर्कं प्रतीक्षते ॐ मित्रस्य त्वा चक्षुषा सर्वाणि भूतानि समीक्षन्तां मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा
समीक्षामहे देवस्य त्वेति प्रतिगृह्णाति ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीत्यनेन मधुपर्कं गृहीत्वा वामकरे मधु
पर्कं निधाय दक्षिणस्यानामिकया त्रिर्विलोडयति ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि इत्यनामिकपादेशिनीमाङ्गुष्ठेनामि
काङ्गुष्ठाभ्यां भूमौ किंचिन्निःक्षिप्य पुनस्तथैव छित्वा एकं क्षिप्येत् तस्य त्रिः प्राश्नाति ॐ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं
मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति मधुमतीभिर्वा प्रतिऋचं वेत्यनेन मंत्रेण वारत्रयं मधुपर्कं प्राश
नं प्रतिप्राशनेऽनेन मंत्रपाठः ततो मधुपर्कशेषमसंचरे देशे धारयेत् ततश्चाचम्य ततः ॐ वाङ्म आस्येऽस्तु ॐ नसोर्मे प्राणोऽस्तु ॐ अक्ष्णोर्मे च
क्षुरस्तु ॐ कर्णयोर्मे श्रोत्रमस्तु ॐ बाह्वोर्मे बलमस्तु ॐ ऊर्वोर्मे ओजोऽस्तु ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु इत्यास्यादि प्रत्येकं सर्वगात्राणि

मे १

वि. क. ६

तास्यपूर्वदृष्टपुरुषः अन्यदपि तत्तु प्रयुक्तमालेनादिष्टं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा ततः सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकांगुष्ठाभ्यां उत्त्
राग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं प्रणीतोदकेन प्रोक्षणीप्रोक्षणं ततः प्रोक्षणीपात्रस्य सव्यहस्ते करणं अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिंगनं प्रणीतोदकेन प्रोक्षणीप्रो
क्षणं ततः प्रोक्षणीजलेन यथासादितवस्तुसेचनं ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निधानं आज्यस्थाल्यामाज्यनिर्वापः ततोऽधिश्रयणं ततो ज्वलत्तृणादिना हविर्वेष्टयि ।
त्वा प्रदक्षिणक्रमेण पर्यग्निकरणं ततः स्रुवः प्रतपनं कृत्वा संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवसंमार्जनं कृत्वा प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्रुवं दक्षिणतो नि ८
दध्यात् ततः आज्यस्याग्रेरवतारणं ततः आज्ये प्रोक्षणीवदुत्पवनं अवेक्षणं सत्यपद्रव्ये तन्निरसनं पुनः प्रोक्षणीमुत्पवनं ततः उपयमनकुशानादाय उत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा ।
6 तूष्णीमग्नौ समिधः क्षिपेत् ततः उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निपर्युक्षणं कृत्वा प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमे
ऽग्नौ स्रुवेणाज्याहुतीर्जुहोति तत्राघारादारभ्य षष्ठाहुति घृतन्तादाहुत्यनन्तरं स्रुवावस्थितहुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ इन्द्राय स्वाहा इ
दमिन्द्राय इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ ॐ भूः स्वाहा इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः एता महाव्याहृतयः ॐ त्वन्नो अग्ने वरुण
स्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नीवरुणाभ्यां ॐ स त्वन्नो अग्ने अवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरु
णं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा इदमग्नये ॐ ये ते शतं वरुण
ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः स्वाहा इदं वरुणा ॐ उ
दुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय एताः सर्वप्रायश्चित्तसंज्ञकाः ततो न्वारंभं विना ॐ ऋताषाड्
ऋतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदमृतासाहे ऋतधाम्ने अग्नये गन्धर्वाय ॐ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा इदमोष राम
धिभ्योऽप्सरोभ्यो मुद्भ्यः ॐ संहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदं संहिताय विश्वसाम्ने सूर्याय गन्धर्वाय ॐ संहितो विश्वसामा सूर्यो गन्धर्वस्तस्य ६

स्यामकशर्मणः प्रपौत्री अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्री अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्री अमुकगोत्रायामुकप्रवरायामुकशर्मणे ब्राह्म-
णाय वराय तुभ्यमहममुकगोत्रामुकप्रवरामुकनाम्नीमिमां कन्यां सालंकारां प्रजापतिदैवतां स्वर्गकामः पत्नीत्वेनाहं संप्रददे इति कन्यादानं स्वस्तीति प्रतिवचनं ॐ
द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु इति वरः पठेत् ततः कन्याप्रदः ॐ अद्य पलैतैः तत्कन्यादानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतममुकगोत्रायामुकप्रवरायामुकशर्मणे ब्राह्मणाय व-
राय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्तीति प्रतिवचनं गोमिथुनं वा धारयेत् ॐ को दात् कस्मा अदात् कामोऽदात् कामायादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते
इति वरः पठति ततस्तां पाणौ गृहीत्वा पठेत् यदैषि मनसा दूरं दिशोऽनुपवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु असौ अमुकदेवि इति पठति कन्यातिदत्तो वरो दक्षिणांसा
वारिपूर्णं दृढकलशं इति कश्चिन्मौनी नरः पुरुषस्य स्कंधे अभिषेकपर्यंतं धारयेत् ततः ॐ परस्परं समीक्षेथां इति प्रैषानंतरं ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चा वीर-
सूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः सोमोऽददद्गंधर्वाय गंधर्वो ददग्नये रयिं च पुत्रांश्चादाद-
ग्निर्मह्यमथो इमां सा नः पूषा शिवतमामेरय सा न ऊरू उशती विहर यस्यामुशंतः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्यै इति वरः पठति मंत्रांते परस्परं निरीक्षणांते अग्निप्रद-
क्षिणीकृत्य पश्चादग्नेः हस्तवस्त्रवेष्टिते तृणपूलके कटे वा तदुपरि दक्षिणाचरणं दत्त्वा वधूं दक्षिणतः कृत्वा तामुपवेश्य स्वयमुपविश्य वरः पुष्पचंदनताम्बूलवस्त्राण्यादाय अद्य
कर्तव्यविवाहकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनैः ॐ यथाविहितं कर्म कुर्विति वरेणोक्ते ॐ करवाणीति ब्राह्मणो वदे-
त् ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य ब्राह्मणमग्निप्रदक्षिणक्रमेणानीय अस्मिन् कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय कल्पितासने उपवेशयेत् ततः प्रणीतापात्रं पुरतः कृ-
त्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतं ब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायव्यांतं
अग्नितः प्रणीतापर्यंतं ततोऽग्नेरुत्तरतः पश्चिमादिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनंतर्गर्भं कुशद्वयं प्रादेशमात्राः समिधस्तिस्रः स्रुवः आज्यं षट्पंचाशदुत्तरमुष्टिश-
तद्वयावच्छिन्नं तंडुलपूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयं अथ तस्यामेव दिशि अश्मा परश्वा वस्तूपकल्पनीयं मितं शमीपलाशमिश्रा लाजाः शेषदृषत्कुमारीभ्रा-

तांबूलवासोभिस्त्वामहं वृणे इति ब्राह्मणं वृणुयात् ॐ वृतोऽस्मी-
ति प्रतिवचनं ५

द॰ क॰ ७

वत्वस्मिन्॥ इदमन्नाय साम्राज्यानामधिपतये ॐ सोमश्चौषधीनामधिपतिः स मावत्वस्मिन्॥ इदं सोमायौषधीनामधिपतये ॐ सविता प्रसवानामधिपतिः स मावत्वस्मिन्॥ इदं सवित्रे प्रसवाना।
मधिपतये ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन्॥ इदं रुद्राय पशूनामधिपतये अत्र प्रणीतोदकस्पर्शः ॐ त्वष्टा रूपाणामधिपतिः स मावत्वस्मिन्॥ इदं त्वष्ट्रे रूपाणामधिपतये ॐ विष्णुः पर्व
तानामधिपतिः स मावत्वस्मिन्॥ इदं विष्णवे पर्वतानामधिपतये ॐ मरुतो गणानामधिपतयः स मावन्त्वस्मिन्॥ इदं मरुद्भ्यो गणानामधिपतिभ्यः ॐ पितरः पितामहाः परेवरे ततास्ततामहाः इह मा
वन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा। इदं पितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः। अत्र प्रणीतोदकस्पर्शः इत्यभ्यातानानमकं अग्नि
रैतु प्रथमो देवतानां सोस्यै प्रजां मुञ्चतु मृत्युपाशात् तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघन्न रोदात् स्वाहा। इदमग्नये। ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीव
तामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा। इदमग्नये। ॐ स्वस्ति नो अग्ने दिव आ पृथिव्या विश्वानि धेह्ययथा यजत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा। इदमग्नये। ॐ
सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः। अपैतु मृत्युरमृतं न आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा। इदं वैवस्वताय। अत्र प्रणीतोदकस्पर्शः। अथांतरपटः। ॐ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य
इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा। इदं मृत्यवे। अत्र प्रणीतोदकस्पर्शः। अथ लाजाहुतिः। ततो वधूमग्रतः कृत्वा वधूवरौ प्राङ्मुखौ स्थितौ भवतः। ततोवधं।
लिपुसेपरिसंलपव वधूंजलिस्य घृताधारितव घृतास्यदत्तमसीपलाशमिश्रैर्लाजैर्वधूकर्तृको मंत्रपाठपूर्वको होमः। ॐ अर्यमणं देवं कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा। इदमर्यम्णे। ॐ
इयं नार्युपब्रूते लाजानावपन्तिका। आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा। इदमग्नये। इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं स्वाहा। इदमग्न
ये। ततो वरो वध्वा दक्षिणहस्तं साङ्गुष्ठं गृह्णाति। ॐ गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः। अमोहमस्मि सा त्वं सा त्वमस्यमोहं। सामाहम राम
स्मि ऋक् त्वं द्यौरहं पृथिवी त्वं तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्दावहै बहून्। ते सन्तु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतं ७
शृणुयाम शरदः शतमिति मंत्रेण। अथ वधूमग्रेणोत्तरतः आग्नेय्यां पूर्वं प्रकल्पितदृषदुपरि दक्षिणपादेनारोहयति वरः ॐ आरोहेममश्मानमश्मेव त्वं स्थिरा भव। अभितिष्ठ पृतन्य

मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यः ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय ॐ सु ।
षुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः ॐ इषिरो विश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इद ।
मिषिराय विश्वव्यचसे वाताय गन्धर्वाय ॐ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापो अप्सरस ऊर्जो नाम ताभ्यः स्वाहा इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यः ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु त ।
स्मै स्वाहा वाट् इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तावा नाम ताभ्यः स्वाहा वाट् इदं दक्षिणाभ्योऽप्सरोभ्यः स्तावाभ्यः ॐ प्रजापतिर्विश्वक ।
र्मा मनो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय ॐ प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा वाट् इ ।
दमृक्सामाभ्योऽप्सरोभ्य एष्टिभ्यः इति राष्ट्रभृत ॐ चित्तं च स्वाहा इदं चित्ताय ॐ चित्तिश्च स्वाहा इदं चित्त्यै ॐ आकूतं च स्वाहा इदमाकूताय ॐ आकूतिश्च स्वाहा इदमाकूत्यै ॐ विज्ञातं च स्वा
हा इदं विज्ञाताय ॐ विज्ञातिश्च स्वाहा इदं विज्ञात्यै ॐ मनश्च स्वाहा इदं मनसे ॐ शक्वरीश्च स्वाहा इदं शक्वरीभ्यः ॐ दर्शश्च स्वाहा इदं दर्शाय ॐ पौर्णमासं च स्वाहा इदं पौर्णमासाय ॐ बृह ।
च्च स्वाहा इदं बृहते ॐ रथन्तरं च स्वाहा इदं रथन्तराय ॐ प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा इदं प्रजापतये
जयानिन्द्राय इति जयहोमः ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा इदमग्नये भूतानामधिपतये ॐ
इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन्० इदमिन्द्राय ज्येष्ठानामधिपतये ॐ यमः पृथिव्या अधिपतिः स मावत्वस्मिन्० इदं यमाय पृथिव्या अधिपतये ॐ वायुरन्तरिक्षस्या
धिपतिः स मावत्वस्मिन्० इदं वायवेऽन्तरिक्षस्याधिपतये ॐ सूर्यो दिवोऽधिपतिः स मावत्वस्मिन्० इदं सूर्याय दिवोऽधिपतये ॐ चन्द्रमा नक्षत्राणामधिपतिः स मावत्वस्मिन्० इदं चन्द्रमसे नक्ष
त्राणामधिपतये ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावत्वस्मिन्० इदं बृहस्पतये ब्रह्मणोऽधिपतये ४२ ॐ मित्रः सत्यानामधिपतिः स मावत्वस्मिन्० इदं मित्राय सत्यानामधिपतये ॐ वरुणो
ऽपामधिपतिः स मावत्वस्मिन्० इदं वरुणायापामधिपतये ॐ समुद्रः स्रोत्यानामधिपतिः स मावत्वस्मिन्० इदं समुद्राय स्रोत्यानामधिपतये ॐ अन्नं साम्राज्यानामधिपतिः स मा

१: क:
४

ष्कृते स्वाहा इदमग्नये स्विष्टकृते स्रुवाग्रा ग्राज्यस्य प्रोक्षणीपात्रे प्रक्षेपः अपंचहोमोऽन्वारब्धकर्त्तृकः ततस्त्राचम्य संस्रवप्राशनं अथाचम्य ॐ प्रयक्ष्मैतेनद्धिवाहहोमकर्मणि कृ
ताकृतावेक्षणारूपब्रह्मकर्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे इति ब्रह्मणे दक्षिणां दद्यात् ॐ स्वस्तीति प्रत्युक्ते ब्रह्मग्रंथिविमोकः ॐ सुमित्रियान आपऔ
षधयः संतु इति पवित्रं गृहीत्वा प्रणीताजलेन शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यैशान्यां प्रणीतां न्युब्जां कुर्यात् ततस्तरणक्रमेण वर्हिरुत्थाप्याज्येनाभिघार्य हस्ते
नैव वर्हिर्होमः तत्क्रम ॐ देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः स्वाहा ततउत्थाय वध्वा दक्षिणहस्तेन स्रुवेण शेष घृतं पूर्णफलैः पूर्णाहुतिः तत्र मंत्र ॐ मूर्द्धानं दिवो
अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कवि सम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा इदमग्नये ततउपविश्य स्रुवेण भस्मानीय दक्षिणानामिकया गृहीतभस्मना ॐ त्र्यायुषं जमदग्नेः इति
ललाटे ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां यद्देवेषु त्र्यायुषं इति दक्षिणांसे ॐ तन्नोऽस्तु त्र्यायुषमिति हृदि अनेनैव क्रमेण वध्वा अपि त्र्यायुषं कुर्यात् तत्र नोऽस्त्विस्य स्थाने तत्ते इति विशेषः ततः
आचात् शरणाशं वर्षामी सुवर्णप्रदेः तस्सिंदूरकरणं वरकर्त्तृकं तनोऽन्यैरपि प्रतिष्ठितस्त्रीपुंसैः सिंदूरकरणं ग्राम वचनं च कुर्यात् ग्राम्याः स्त्रियः अथर्वेदोक्तो मराऽपमार्गस्य दूर्वा चतादिश्रहणं
ततस्त्रिरात्रमक्षारलवणाशिनौ अधःशायिनौ निवृत्तमैथुनौ भवतः ततश्चतुर्थ्यामपररात्रे चतुर्थीकर्म तत्र वरः स्नात्वा अंतरस्य वकार्यं तैलोद्वर्तनादिकं स्नात्वा गृहकाष्ठउपविश्य स्नात्वा शुचिव
स्त्रं परिधायाचम्य गृहं प्रविश्य प्राङ्मुखो वधूवरौ उपविशतः तत्र कुशंडिकारंभः तत्रक्रमः कुशैर्हस्तपरिमितं चतुरस्रं भूमिं परिसमुह्य कुशानैशान्यां निःक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूले
नस्फेनवा उत्तरोत्तरत्रिरुल्लिख्य उल्लेखनक्रमेण अनामिकांगुष्ठाभ्यां मृदमुद्धृत्य वा विरागतिदेशमभिषेच्य कांस्यपात्रेणाग्निमादाय तत्र प्रत्यङ्मुखं निदध्यात् ततः पुष्पचंदनतांबूलवासांस्यादाय ॐ अस्यां
रात्रौ कर्त्तव्यचतुर्थीहोमकर्मणि कृताकृतावेक्षणारूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे ॐ वृतोस्मीति ब्राह्मणाव
चनोनंतरं अग्नेर्दक्षिणतः शुद्धमासनं निधाय तदुपरि प्रागग्रान् कुशानास्तीर्याग्निं प्रदक्षिणीकृत्यास्मिन् कर्मणि त्वमेव ब्रह्मा भव इत्यभिधाय ॐ भवानीति तेनोक्ते तं ब्राह्मणमुपवेशयेत् ततः पृथुउदक
पात्रं अग्नेरुत्तरतः प्रतिष्ठाप्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निधाय ततः परिस्तरणं वर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं
अपरं चतुर्थभागेन ब्रह्मणोऽग्निपर्यंतं अपरेण नैर्ऋत्याद्वायव्यांतं अवशिष्टेनाग्नितः प्रणीतापर्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनंतर्गर्भं राम ८
कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली चरुस्थाली संमार्जनार्थं कुशास्त्रयः उपयमनार्थं वेणीरूपकुशास्त्रयः समिधस्तिस्रः स्रुवः आज्यं षट्पंचाशदुत्तरमुष्टिशतद्वयावच्छिन्नामतं डुलपूर्णपा

तोवचाधस्वपत्नना यन्तः इति मंत्रेण आरूढायामेव तस्यां वरो गाथां गायति ॐ सरस्वति प्रेदमव सुभगे वाजिनीवति यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूतं समभवद्यस्यां
विश्वमिदं जगत् तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ततोऽग्नेर्वध्वाः पश्चाद्वरः प्रणीताब्रह्मसहितमग्निं प्रदक्षिणं कुरुतः तत्र वरपठनीयो मंत्रः ॐ तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना स
ह पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ततः पश्चादग्नेः पूर्ववत्स्थित्वा लाजादिमं संगुष्ठहस्तग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणानि पुनरपि तथैव स ते मन लाजाहुत्यः संगुष्ठ
हस्तग्रहणत्रयं अश्मारोहणत्रयं गाथागानत्रयं प्रदक्षिणत्रयं संपद्यते ततो वशिष्ठलाजैः कन्याभ्रातृदत्तैरञ्जलिस्थैः शूर्पकोणेन वध्वा जुहोति ॐ भगाय स्वाहा इदं भगाय ततश्चतु
र्थपरिक्रमणं ततो वर उपविश्य ब्रह्मणान्वारब्धेऽग्नौ आज्येन वरः प्राजापत्यं जुहोति ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा अत्र प्रोक्षणीपात्रे हुतशेषाज्यप्रक्षेपः ततः उदीचीं दिशं आलेख
नेनोत्तरं क्रमेण कृतसप्तमण्डलेषु सप्तपदाक्रमणं वरः कारयति वक्ष्यमाणमंत्रैः तत्र प्रथमे ॐ एकमिषे विष्णुस्त्वा नयतु १ द्वितीये ॐ ऊर्जे विष्णुस्त्वा नयतु २ तृतीये ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा
नयतु ३ चतुर्थे ॐ चत्वारि मायोभवाय विष्णुस्त्वा नयतु ४ पंचमे ॐ पंच पशुभ्यो विष्णुस्त्वा नयतु ५ षष्ठे ॐ षड् ऋतुभ्यो विष्णुस्त्वा नयतु ६ सप्तमे ॐ सखे सप्तपदा भव सा मामनुव्रता भव विष्णु
स्त्वा नयतु ७ ततः कन्यां वामांगे आनीय तदग्नेः पश्चादुपविश्य पुरुषस्कंधस्थितकुंभात् आम्रपल्लवेन जलमानीय तेन वध्वा मूर्धनि वरोऽभिषिंचति ॐ आपः शिवाः शिवतमाः शान्ताः शान्त
तमाः तास्ते कृण्वन्तु भेषजम् इति मंत्रेण पुनस्तत एव कुंभात् तथैवानीय तेन जलेनानेन मंत्रेण अभिषिंचति ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः
उशतीरिव मातरः २ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः ३ इति तिसृभिः ततः सूर्यमुदीक्षस्वेति वधूं संबोध्य वरः प्राह तत ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम श
रदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् इति पठित्वा वध्वः सूर्यं पश्यति अस्तमिते च सूर्ये ध्रुवमुदीक्षस्वे
ति प्रेषानंतरं ध्रुवं पश्यति तत्र वरपठनीयो मंत्रः ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद् बृहस्पतिः मया पत्या प्रजावती संजीव शरदः शतम् इति दृष्ट्वा सा यदि न पश्यति पश्यामी
त्येव ब्रूयात् अथ वरो वधूदक्षिणांसस्योपरि हस्तं नीत्वा तस्या हृदयमालभेत ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमिति मंत्रे
ण अथ वधूमभिमंत्रयति वरः ॐ सुमंगलीरियं वधूरिमां समेत पश्यत सौभाग्यमस्यै दत्वा याथास्तं विपरेतन इति मंत्रेण सिंदूरं वध्वै ददाति अथ वधूं बलवान् रक्तकृष्णचर्मणि उत्थाप्य प्रागुदगनु
सागारे लोहितानडुहचर्मणि आस्तीर्णे उपवेशयेत् वरो वा ॐ इह गावो निषीदंत्विहाश्वा इह पूरुषाः इहो सहस्रदक्षिणोऽपि पूषा निषीदत्विति मंत्रेण अथ स्विष्टकृद्धोमः ॐ अग्नये स्वि

द.कु.
६

य स्वाहा इदं सूर्याय ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै घोरा प्रीतनूस्तामस्यै नाशय स्वाहा इदं गंधर्वाय ततः।
स्थालीपाकेन जुहोति ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा अग्निमाहुतिं दृष्ट्वा केवल स्रुचस्य नेतरद्धृतशेषस्य प्रणीतापात्रे प्रक्षेपः ततो ब्रह्मणान्वा
९ रब्धेन आज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः आज्येन ॐ भूः स्वाहा इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः
स्वाहा इदं स्वः एता महाव्याहृतयः ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्य
स्मत्स्वाहा इदमग्नीवरुणाभ्यां ॐ स त्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदम
ग्नीवरुणाभ्यां ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा इदमग्नये ॐ ये ते शतं वरुण ये सहस्रं य
ज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॐ उदुत्तमं वरुण
पाशमस्मदवाधमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय इति सर्वप्रायश्चित्तं ॐ प्रजापतये स्वाहा इदं प्र
जापतये इति मनसा इदं प्रजापतये ततः संस्रवप्राशनं ततः आचम्य ॐ अस्मात्वो कृतेन स्तनु पीतोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमि
दं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रंथि
विमोकः ततः ॐ सुमित्रिया न आप ओषधयः संतु इति पवित्राभ्यां शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मः इत्यैशान्यां प्रणीतान्युब्जीकरणं परि
स्तरणां अग्नावेव तत स्तरणोत्थानेन बर्हिषानीय घृतेनाभिघार्य हस्तेन जुहुयात् ॐ देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा इत्यनेन
मंत्रेण ततः पश्चात् वरः ब्राह्मणस्य जलमादाय प्रपल्लवेनानीय वधूमूर्द्धि अभिषिंचति ॐ या ते पतिघ्नी प्रजाघ्नी पशुघ्नी लक्ष्मीघ्नी यशोघ्नी निंदितां तामनूजारघ्नीं त राम
तमेनां करोमि सा जीर्य त्वं मया पत्या श्रीसिद्धिः सह अमुकदेवि इति मंत्रेण ततो वधूस्थालीपाकं प्राशयेत् वरः ॐ प्राणैस्ते प्राणान्संदधाम्यस्थिभिर

त्रं चर्वर्थमामतं हुत्वाः सर्वाणि पवित्रच्छेदनकुशानां पूर्वं पूर्वं दिशि क्रमेणासादनीया। निःक्षेप्य पवित्रच्छेदनकुशैर्वरः पवित्रमाछित्वा प्रणीतोदकं त्रिः
सपवित्रकरेण प्रोक्षणीपात्रे निधाय कराभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रपवित्रे गृहीत्वा त्रीरुत्पवने निधाय ततः प्रोक्षणीपात्रं वामहस्ते कृत्वानामि
२५ कांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्गिंगने प्रणीतोदकेन प्रोक्षणीः प्रोक्षणं ततः प्रोक्षणीजलेन यथासादितद्रव्यसेचनं ततो मेरुत्तरतः प्रणीतोदक्षिणादिशि प्रो
क्षणीपात्रे निधाय आज्यस्थाल्यामाज्यनिर्वापः प्रणीताजलं किंचित्रयी निधाय प्रणीताजलेनैव तंडुला प्रक्षाल्य चरौ निर्वपेत् स्वयं च हस्ते गृहीत्वा
णा चाज्यं वेदेरुत्तरतः अंगारं दक्षिणतः आज्यं निध्यात् ततो ज्वलत्तृणादिकमादाय हविः पर्यग्निं दक्षिणाभिमर्प। सावकेशनस्त्वेपः नेच वैवास्य त्रपंस्त्रुवं प्रतप
नं संमार्जनं कुशानामग्रैरन्ततो मूलैर्वा ततः स्रुवसंमार्जनं प्रणीतोदकेनाभ्युक्ष्य पुनः प्रत्येवं प्रतप्य स्रुवं दक्षिणतो निदध्यात् ततो आज्यमग्नितः। पूर्वे
णानीयाग्नेः निदध्यात् पश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात् ततो वा रञ्जपं प्रोक्षणीवदाज्यस्योत्पवनं अवेक्ष्य सत्यपद्रव्ये तन्निरसनं पुनः पूर्ववत्।
उत्पवनं तत उपयमनकुशानादाय वामहस्ते धृत्वा प्रजापतिं मनसा ध्यात्वा उत्तिष्ठन् घृताक्तास्तिस्रः समिधोऽग्नौ क्षिपेत् तत उपविश्य प्रोक्षणीजलेन अग्नि
दक्षिणं पर्युक्ष्य पवित्रे प्रणीतापात्रे धृत्वाग्निप्रज्वलनयोर्मध्ये प्रोक्षणीं निधाय ब्रह्मणान्वारब्धः पातितदक्षिणजानुर्जुहुयात् तत्राघारावाज्यभागौ हुतिचतुष्टयं पतल
र्हुत्यनंतरं स्रुवावस्थिताज्यस्य प्रोक्षण्यां प्रक्षेपः। ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा। ॐ इन्द्राय स्वाहा इदमिन्द्राय हुत्वा चाघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सो
माय स्वाहा इदं सोमाय इत्याज्यभागौ तत्र आज्याहुतिपंचकं ततः स्थालीपाकाहुतीश्च पूर्ववैपिकल्पितम्। प्रोक्षणीपात्रे तत्तदाहुत्यनंतरं हुतशेषप्रक्षेपः आहुतिपंचकं तत्र
न्वारंभः ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा इदमग्नये ॐ वायो प्रायश्चित्ते त्वं
देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा इदं वायवे ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उप
धावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा इदं सूर्याय ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नश्

ह.क.
१
अथपुंसवनं तच्चगर्भमासापेक्षयाद्वितीयेतृतीयेवान्यतरस्मिन्कार्यं पुष्यपुनर्वसुमृगशिरोहस्तमूलश्रवणान्यतमपुन्नामनक्षत्रेपुनोभद्रं।
चन्द्रतारानुकूलदिवसमवगत्यतत्पूर्वदिनेवधूमुपवासंकारयित्वाऽस्मिन्दिनेतस्याःस्नातायाःअहतवासोयुग्मपरिधानानंतरंशुचिःस्नातःस्नाताय।
मनोमातृपूजाभ्युदयिकादिकृत्वावटप्ररोहंवटशुंगापरनाम्नाचारात्कुशकंटकमपिनिशिशिलायांपिष्ट्वाधृतंदक्षिणनासापुटेनसंदद्यात्हिरण्य
गर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत्सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेयअद्भ्यःसंभृतःपृथिव्यैरसाच्चविश्वकर्मणःसमव
10 र्तताग्रेतस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रेइतिमंत्राभ्यां अथसीमंतोन्नयनं तच्चगर्भसीमोपेक्षयाषष्ठेऽष्टमेवापुन्नामनक्षत्रेपुतचंद्रता।
रानुकूलविहितदिनेमातृपूजाभ्युदयिकादिकृत्वावह्निःशालायांकुशकंडिकांकुर्यात्तत्रक्रमःकुशत्रयेणहस्तपरिमितस्थलमभिपरिसमुह्यकुशानैशान्यांनिः
क्षिप्यगोमयोदकेनोपलिप्यस्रुवमूलेनस्फ्येनवाउत्तरोत्तरतःप्रादेशमात्रंरेखात्रयमुल्लिख्यउल्लेखनक्रमेणानामिकांगुष्ठाभ्यांमुद्धृत्यवारिणातंदेशमभिषिच्यकांस्यपात्रेण
अग्निमाधायपात्रप्रयस्यमुखंनिदध्यात्ततोब्राह्मणवरणंअथकर्तव्यसीमंतोन्नयनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मण
मेभिःपुष्पचंदनताम्बूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणेइतिवृतोऽस्मीतिप्रतिवचनं यथाविहितंकर्मकुर्वितिप्रत्याभिहितेकरवाणीतिब्रह्मवचनानंतरंमेग्रे
दक्षिणतःशुद्धमासनंदत्वातदुपरिप्रागग्रान्कुशानास्तीर्यास्मिन्सीमंतोन्नयनकर्मणित्वंमेब्रह्माभवेत्यभिधायभवानीतितेनोक्तेअग्नेर्दक्षिणतःकार
यित्वाब्रह्माणंतत्रोपवेशयप्रणीतापात्रंपुरतःकृत्वाजलेनापूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकुशोपरिनिदध्यात्ततःपरिस्तरणंबर्हि राम
षश्चतुर्थभागमादायाग्नेयादीशानांतंब्रह्मणोऽग्निपर्यंतंनैर्ऋत्याद्वायव्यांतंअग्नितःप्रणीतापर्यंतंततोऽग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयंप १

विवाहकर्म समाप्तम् अथ संस्काराः उच्यंते ६

स्पीनि मा पंसानि संदधामि ते बालत्वं इति मंत्रेण मूर्ध्न्याघ्राणं संदधाति इति मंत्रचतुष्टयेन इति मंत्रेणोन्मूर्ध्न्याघ्राणं ततो बद्घा हृदये स्पृष्ट्वा वरः पठति उं पत्नेसु
शीमिह दयं दिवि चंद्रमसि श्रितं वेदाहं तन्मा तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमिति त्र्यंबकं करणमोहणं पु
तं ग्रंथिविमोकादी निग्रीचारश्रतिरामानितत उन्मापवधूमदाविणहस्तस्पृष्ट्वा स्नुवेन घृतफलपुष्पर्णेन उंम्रहुतानां दिवो अंतरिक्षं पृथिव्यां वैश्वानरस्य ब्रह्मा
जातमग्निं कवि पं संम्राजमतिथिं जनानां घोसन्नापाचं जनं यं तदेवाः स्वाहा इति मंत्रेण पूर्णाहुतिः ततः स्नुवेन भस्मानीय दक्षिणानामिकाग्रगृहीतभ
स्मनाउं त्र्यायुषं जमदग्नेः ललाटे उं कश्यपस्य त्र्यायुषं इति ग्रीवायां यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले उं तन्नो अस्तु त्र्यायुषमिति हृदि इति त्र्यायु
षं कुर्यात् ऋत्विग्भ्यो दक्षिणां दद्यात् पितृलोकस्य स्पर्शनेन तद्इति विशेषः अथ गर्भाधानं तत्र ऋतुस्नाता चतुर्थे दिने वधूः प्रातः स्नात्वा मादिस्य पतिः स्नेत्
ततस्तद्दिने मातृपूजाभ्युदयिकं कृत्वा चतुर्थरात्रादर्वाक् कुंभभरात्रौ वद्दिशा प्रति वेष्ट्वा उपस्थमभिमृश्य जपति उं विष्णुर्योनिं कल्पयतु त्वष्टा रू
पाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते इति मंत्रेण अथ प्राङ्मुखः उपविष्टः उदङ्मुखो वा सनाम मिमंत्रयेदनेन उं गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके गर्भं ते।
अश्विनौ देवौ धत्तां पुष्करस्रजाविति मंत्रेण उं रेतो मूत्रं विजहाति योनिं प्रविशदिंद्रियं गर्भो जरायुणावृत उल्बं जहाति जन्मना इति मंत्रेण रेतःस्राव
णं अथ पत्न्या हृदयमालभ्य उं यत्ते सुशीमे हृदयं दिवि चंद्रमसि श्रितं वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः ।
शतमिति मंत्रेण ततः स्वस्त्याहं पुमानश्नं तं कामयमाना मग्नशाय्यापां प्रदोषात् दूर्वा इति प्रमभिगच्छेत् तस्या पविगर्भं न दधाति तदा यतिकृतोपवासः पुष्यन
क्षत्रे श्वेतकंटकि मूलं सुताहस्तेन पिष्ट्वा धनामापुटेन स्वदयात् अनेन मंत्रेण उं इयमोषधी त्रायमाणा सहमाना सरस्वती अस्याः अहं बृहत्याः पुत्रः पितुरिव नाम

द॰क॰ ११ हुतिचतुष्टये कृत्यनंतरं हुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ततः समिद्धतमेग्नौ ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ इन्द्राय स्वाहा इदमिन्द्राय
इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ ततो ऽन्वारब्धः स्थालीपाकेन होमः ॐ प्रजापतये स्वाहा इदं प्रजापतये
इति मनसा ततो ऽन्वारब्धे जुहुयात् तत्र हुत्यनंतरं स्रुवावस्थितशेषस्य प्रोक्षणीपात्रे प्रक्षेपः तत्रैवाज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः ॐ अग्नये स्विष्ट
कृते स्वाहा इदमग्नये स्विष्टकृते ॐ भूः स्वाहा इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः एता महाव्याहृतयः त्वन्नो अग्ने वरुणस्य विद्वान्देव
स्य हेडो अव यासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां ॐ स त्वन्नो अग्ने ऽवमो भवोती नेदिष्ठो अस्या
उषसो व्युष्टौ अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया
असि अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा इदमग्नये ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे
मुंचन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा व
यमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय इति सर्वप्रायश्चित्तं ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा इति प्राजापत्यं अथ संस्र
वप्राशनं ततश्चाचम्य ॐ अद्यास्मिन्सीमन्तोन्नयन होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगो ।
त्रायामुकशर्मणे ब्राह्मणाय ब्रह्मन्दक्षिणात्वेन तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रंथिविमोकः ततः सुमित्रिया न राम
आप ओषधयः संतु इति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै संतु यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति ऐशान्यां प्रणीता न्युब्जीकरणं ततस्त ११

वित्रकुरणार्थमनंतर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली चरुस्थाली संमार्जनकुशाः उपयमनकुशाः प्रादेशमितपलाशसमिधस्तिस्रः स्रुवः आज्यं षट् ।
पंचाशदुत्तरपूर्णमनुमुष्टिशतद्वयावच्छिन्नतंडुलपूर्णपात्रं तिलमुद्गमिश्रास्तंडुलाः एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनी
यानि तदुत्तरतो वीणागाथिनौ प्रादेशमितसम्याग्र्यस्य शंकुः त्रिश्वेतशल्लकीकंटकं शीतसंपूर्णास्तिकुः दर्भपिंजलिकात्रयं पंचौदुंबरफलानि त ।
सारवद्द्वयं औदुंबरयुग्मफलसुवर्णघटितदेवाकर्करादियुक्तसूत्रडोरकपुष्पविल्वादिफलपुतवाराघृतपादि अन्यदप्याचारपरिप्राप्तद्रव्यमा
सादनीयं ततः पवित्रच्छेदनकुशैः प्रादेशमिते पवित्रे कृत्वा सपवित्रपाणिना प्रणीतोदकं त्रिः प्रोक्षणीपात्रे स्पस्य अनामिकांगुष्ठाभ्यामुत्तरा
ग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणं अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुदंगनं प्रणीतोदकेन प्रोक्षणीप्रोक्षणं त
तः प्रोक्षणीजलेन यथासादितद्रव्यसेचनं ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानं तत आज्यस्थाल्यामाज्यनिर्वापः चरौ तु तिलतंदुलमुद्गा
नां प्रणीतोदकेन प्रक्षाल्य किंचिज्जलं दत्वा ततः स्वयं चरुं गृहीत्वा ब्रह्मणाज्यं वह्नेरुत्तरतश्चरुं दक्षिणत आज्यं निदध्यात् ततः सिद्धचरौ ज्वलत्त
णं प्रदक्षिणं भ्रामयित्वा वह्नौ तत्प्रक्षेपः ततः स्रुवप्रतपनं त्रिः ततः संमार्जनकुशानामग्रैरंततो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः
प्रतप्य दक्षिणतो निदध्यात् तत आज्यमग्नितश्चरोः पूर्वेण नीत्वा अग्रे धृत्वा आज्यं पश्चिमेनहुरेचमानीयाज्यस्योत्तरतो निदध्यात् तत आज्ये प्रोक्षणी
वत्पुत्पवनं अवेक्ष्य सत्यपद्रव्ये निरसनं पुनः पूर्ववत्प्रोक्षण्युत्पवनं तत उपयमनकुशानादाय प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ समिधः प्र
क्षिपेत् अथोपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणक्रमेण पर्युक्ष्य प्रणीतापात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुर्जुहुयात् तत्र

पति
द.क. अथ जातकर्म तत्र प्रथमं शुल्लवतीभिः परिषिंचति ॐ एजतु दशमास्यो गर्भो जरायुणा सह इति मंत्रेण ततो वधूसमीपेऽग्नेः पतिः ॐ अवैतु पृ-
१२ श्नि शेवलं शुने जरायवत्तवे नैव मांसेन पीवरी न कस्मिंश्चनायतनमव जरायु पद्यताम् इति ततः पुत्रे जाते नाभिवर्द्धनात् प्राक् क्ष-
ताभ्युदपि कः कुमारं दक्षिणकरस्थानामिकया स्वर्णान्तर्हितेन पायं मधुघृते सकृत्प्रघृतमेव प्राशयति ॐ भूस्त्वयि दधामि ॐ भुवस्त्वयि
दधामि ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि इति मंत्रेण एतत्त्रयं मेधाजननं ततः कुमारस्य दक्षिणकर्णे नाभ्यां वा मुखं कृत्वा ॐ अग्निरायुष्मा-
12 न्स वनस्पतीभिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि ॐ सोम आयुष्मान्स ओषधीभिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि ॐ ब्रह्मायुष्म-
